Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ सरस्वतीमन्त्रप्रसङ्गात् कल्पान्तरोक्तबालासरस्वतीमन्त्रोऽपि योग्यतावशात् लिख्यते —

ब्रह्मा ऋषिः । गायत्री छन्दः । बालासरस्वती देवता । ऐं बीजं । क्लीं शक्तिः । सौः कीलकम् । ऐं हृत् । क्लीं शिरः । सौः शिखा । ऐं कवचम् । इत्याद्यङ्गानि ॥

अरुणकिरणजालै रञ्जिताशावकाशा
विधृतजपवटीका पुस्तकाभीतिहस्ता ।
इतरकरवराढ्या फुल्लकल्हारसंस्था
निवसतु हृदि बाला नित्यकल्याणरूपा ॥

ध्यानान्तरम् —

मालासृणीपुस्तकपाशहस्तां बालाम्बिकां श्रीललितां कुमारीम् ।
कुमारकामेश्वरकेळिलोलां नमामि गौरीं नववर्षदेश्याम् ॥

ऐं क्लीं सौः सौः क्लीं ऐ ॥ इति मन्त्रः विद्याप्रधानोयं मन्त्रः ॥